# ५४ शिबिरात्मक-संस्कृतसम्भाषण-शिबिराभियानान्ते समायोजितः समारोपसमारोहः

२०१४ तमस्य वर्षस्य जुलै-मासस्य चतुर्विंशतितमात् दिनात् ओगस्टमासस्य द्वितीयं दिनं यावत् श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा वेरावल-प्रभास-पाटणे, तत्समीपस्थेषु क्षेत्रेषु च यत् ५४ संस्कृतसम्भाषणशिबिरात्मकम् अभियानम् आयोजितमासीत् तद् ओगस्टमासस्य तृतीये दिने जुनागढमार्गे विद्यमानस्य सुविशालस्य स्वामिनारायणमन्दिरस्य सभागृहे समायोजितेन समारोपसमारोहेण पूर्णतां प्राप्नोत्। समारोहेऽस्मिन् उपसहस्रं संस्कृतमधीतवन्तः शिबिरार्थिनः, अस्य क्षेत्रस्य नैके गणमान्याः जनाः च उपस्थितवन्तः। कार्यक्रमोऽयं मध्याह्ने १:३० वादनादारभ्य सायं ४:३० वादनं यावत् प्रवृत्तः।

कार्यक्रमारम्भे विश्वविद्यालयस्य विद्वद्भिः अध्यापकैः विरचितं गीतं प्रस्तुतवती प्रो. अर्चनादूबे महाभागा। ततश्च शिबिरार्थिभिः बालैः लघुनाटकं समूहगीतं च प्रस्तुतम्। ततः विश्वविद्यालयस्य छात्रैः सुन्दरं गणेशवन्दनापरकं नृत्यं प्रस्तुतम्।




वामतः पूर्वकुलपतयः डॉ. पङ्कजजानी, कुलपतयः प्रो. वेम्पटिकुटुम्बशास्त्री, मुख्यातिथिः स्वामिसच्चिदानन्दः, श्रीसी.पी.पटेलः (Collector), श्रीजसाभाईबारडः (M.L.A.), श्रीजेठाभाईसोलंकी (M.L.A.), श्रीजवेरीभाईठकरारः (President, Gir-Somnath B.J.P.)

ततोऽग्रे कार्यक्रमस्य मुख्यवक्तुः स्वामिसच्चिदानन्दस्य सभागृहे पदार्पणं जातम्। तैः सममेव कार्यक्रमं भूषयितुं समागताः विश्वविद्यालयस्य पूर्वकुलपतयः डॉ. पङ्कजजानी महोदयः, भारतीय-जनता-पार्टी इत्यस्य वरिष्ठः अधिकारी श्रीजवेरीभाईठकरार महोदयः, गीर-सोमनाथ-जनपदस्य समाहर्ता श्री सी. पी. पटेल महोदयः, धारासभ्यः श्री जसाभाई बारड महोदयः, धारासभ्यः श्री जेठाभाई सोलंकी महोदयः च। विश्वविद्यालयच्छात्रैः डॉ. पङ्कज रावलेन च वेदघोषसहितं मान्यवराणां स्वागतं विहितं, तेषां करकमलाभ्यां दीपज्वालनं च कारितम्। ततः विश्वविद्यालयस्य कुलपतिना प्रो. वी. कुटुम्बशास्त्रिणा समागतानां मान्यवराणां वाक्कुसुमैः स्वागतं विहितं, कार्यक्रमस्य प्रास्ताविकं च उक्तम्। स्वीये उद्बोधने कुलपतिना उक्तं ''गुजरातराज्यं नैकेषु विषयेषु प्रथमक्रमे वर्तते। सम्प्रति गुजरातस्थं वेरावल-प्रभास-पाटणनगरम् अपि देशस्य प्रथमं संस्कृतनगरं भवतु इति अस्माकं संकल्पः वर्तते, तदर्थं च वयं प्रयत्नरताः स्मः'' इति। संस्कृतप्रशस्तिं कुर्वता तेन उक्तं यत् संस्कृतं नास्ति चेत् संस्कृतिः नास्ति, संस्कृतं नास्ति चेत् ईश्वरोऽपि नास्ति, यतः ईश्वरं वर्णयत्, परिचाययत् च सर्वमपि अस्माकं साहित्यं संस्कृते एव वर्तते। धर्मः, प्रसादः, नैवेद्यम् इत्यादयः विशिष्टाः संकल्पनाः संस्कृतं विना भाषान्तरद्वारा बोद्धुमेव न शक्यन्ते। अतः अस्माकं संस्कृतेः सम्यक् ज्ञानाय संस्कृतम् अनिवार्यम्। कार्यक्रमे उपस्थितान् नागरिकान् उद्दिश्य तेन उक्तं, ''भवन्तः सर्वे पारम्परिकरीत्या शास्त्राध्ययनमेव कुर्वन्तु इति अपेक्षा नास्ति, अपितु स्वे स्वे क्षेत्रे कार्यरताः सन्तः संस्कृतमपि पठन्तु इति अस्माकम् आशयः, यतो हि संस्कृतं विना भारतीयः जनः पूर्णतां प्राप्तुं न शक्नोति'' इति। कुलपतिभाषणान्ते समागतानां मान्यवराणां पुष्पगुच्छेन, राङ्कवेन, स्मृतिचिह्नेन च सत्क्रिया विहिता।

ततः कार्यक्रमाय विशेषतया समागतेन विश्वविद्यालयस्य पूर्वकुलपतिना श्रीमता पङ्कजजानी महाभागेन उक्तम्, संस्कृतसम्भाषणमाध्यमेन व्यक्तिनिर्माणाय, व्यक्तिनिर्माणद्वारा च राष्ट्रनिर्माणाय वयं कटिबद्धाः स्मः इति। स्वीये उद्बोधने धारासभ्येन श्रीमता जसाभाई बारडमहोदयेनापि संस्कृतस्य महती प्रशस्तिः कृता। गुजरातराज्यस्य भूतपूर्वेण मुख्यमन्त्रिणा श्रीमता नरेन्द्रमोदीमहाभागेन यदा गुजराते प्रथमस्य संस्कृतविश्वविद्यालयस्य स्थापनाय प्रस्तावः कृतः तदा सोमनाथमन्दिरस्य सान्निध्ये एव ईदृशः विश्वविद्यालयः संस्थापितः भवतु इति आग्रहपूर्वं तेन महता कण्ठेन प्रस्तावः समर्थितः आसीत् इति स्वीये भाषणे तेन ज्ञापितम्। जनपदस्य समाहर्त्रा श्रीमता सी. पी. पटेलमहोदयेन स्वीये उद्बोधने कुलपतिना, कुलपतिचरेण च याः अपेक्षाः व्यक्तिकृताः तासां पूरणे स्थानीयशासनस्य सम्पूर्णं समर्थनं सहयोगश्च प्रतिश्रुतः। ततोऽग्रे मञ्चस्थानां महानुभावानां करकमलाभ्यां सोमज्योति-पत्रिकायाः लोकार्पणं जातम्। सभाकार्यक्रमस्य अङ्गतया शिबिरेषु पठितवतां नागरिकाणां प्रतिनिधित्वेन वैद्या श्रीमती निमिषा माखणसा, कृषकः श्री नाजाभाई, बालः ओम् च शिबिरे अध्ययनस्य अनुभवं कथितवन्तः। ततोऽग्रे यस्य वाणीं श्रोतुं सर्वेऽपि समुत्सुकाः आसन् तस्य स्वामिसच्चिदानन्दस्य भाषणं प्रवृत्तम्।

सभाकार्यक्रमानन्तरं रञ्जकाः सांस्कृतिककार्यक्रमाः प्रस्तुताः। सांस्कृतिककार्यक्रमाणां निर्वहणाय द्वौ कार्यकर्तारौ गोपाल उपाध्यायः, दर्शन भट्टः च संस्कृतभारती, गुजराततः विशेषतया आगतौ आस्ताम्। अन्यैः संगत्य ताभ्यां अभिनवपद्धत्या सांस्कृतिककार्यक्रमस्य सञ्चालनं कृतम्। कार्यक्रमे विशेषतया प्रशिक्षिताभिः विश्वविद्यालयस्य छात्राभिः संस्कृतगरबानृत्यं प्रस्तुतम्। तदनु वेरावलस्थेन आर्ट-ओफ्-लिविंग-संस्थायाः कार्यकर्तृगणेन योगस्य महत्त्वं ज्ञापयन् संवादः कश्चित् प्रस्तुतः। अन्ते विश्वविद्यालयस्य छात्राभिः गुर्जरधरे विभासि इति गीतमवलम्ब्य अद्भुतं नृत्यं प्रस्तूय सर्वेषाम् अपि प्रेक्षकाणां मनांसि हृतानि।

कार्यक्रमात् प्राक् नगरे शिबिराभियानेन युगपदेव विश्वविद्यालये संस्कृतसप्ताहः आचरितः। सप्ताहेऽस्मिन् विविधाः स्पर्धाः आयोजिताः आसन्। यैः छात्रैः तत्र विजयः अवाप्तः आसीत्, तेषां प्रमाणपत्रदानेन प्रोत्साहनम् अत्रैव कृतम्। तदनु नगरे सञ्चालिते संस्कृतसम्भाषणशिबिरेषु यैः भागः ऊढः तेभ्यः विश्वविद्यालयपक्षतः प्रमाणपत्रदानाय विविधानां शिबिराणां संयोजकाः क्रमशः मञ्चमाहूताः। आदरणीयैः महानुभावैः तेभ्यः तत्तत्शिबिरेषु भागमूढवतां प्रमाणपत्राणां बन्धाः समर्पिताः।



दक्षिणतः प्रो.विनोदकुमारझा, श्रीहिमांजयपालिवालः, प्रो.वेम्पटिकुटुम्बशास्त्री, छत्तिसगढतः आगतौ महानुभावौ